
**PSBB Learning Leadership Academy**

Bangalore-2020-21

Class: VIII    Sub:- Sanskrit II Lang

Topic:- अव्ययानि

---



## अव्ययानि – 2

1. यदा–तदा– ____________________
2. यदि–तर्हि– ____________________
3. किन्तु – ____________________
4. अतः – ____________________
5. अथवा – ____________________
6. मा – ____________________
7. प्रायः – ____________________
8. कथम् – ____________________
9. एव – ____________________
10. पुरा – ____________________

65

1) यदा - तदा ( When - Then )
यदा प्रातः  भवति , तदा कृषिकाः  कृषिकार्यं कर्तुं
क्षेत्रं  प्रति  गच्छन्ति।

2)यदि - तर्हि  ( If - then )
यदि  भवन्तः  सम्यक्  पठन्ति,  तर्हि  जीवने यशः  लप्स्यन्ते।

3)किन्तु  ( But )
सः छात्रः बुद्धिमान् , किन्तु न पठति।

4)अतः ( Therefore )
सुरेशः अस्वस्थः  अस्ति, अतः सः क्रीडितुं न आगच्छति।

5) अथवा ( Or )
त्वं  सम्यक्  पठ , अथवा सम्यक्  कीड।

6) मा ( Don't)
छात्राः ! , कोलाहलं मा कुर्वन्तु।

7) प्रायः ( Mostly)
प्रायः अद्य वर्षा आगच्छति।

8)कथम् ( How )
त्वं परीक्षायां कथं प्रथमस्थानं प्राप्तवान् ?

9) एव ( Only )
देवः एव सर्वेषां रक्षतः अस्ति।

10) पुरा ( Long ago)
पुरा अयोध्यायां दशरथः नाम राजा आसीत्।

---------------------------------------------------------

I उचितैः अव्ययैः रिक्तस्थानानि पूरयत ।

1. ईश्वरः __________ सर्वान् रक्षति ।

2. सः रुग्णः अस्ति । __________ विद्यालयं न गच्छति ।

3. जनाः __________ ग्रीष्मे पर्वतीयस्थलानि गच्छन्ति ।

4. असत्यं __________ वद ।

5. त्वं प्रातः व्यायामं करोषि __________ सायङ्काले ?

6. अत्र कलमः अस्ति । __________ कलमे मशी नास्ति ।

7. __________ भारते अनेके महात्मानः आसन् ।

8. ते __________ धावन्ति ?

II प्रदत्ततालिकाम् उपयुज्य यथेच्छं वाक्यानि रचयत ।

| | | | |
|---|---|---|---|
| पुरा<br>एव<br>कथम्<br>प्रायः | जनाः<br>साधवः | संस्कृतेन<br>वने<br>परोपकारं<br>नगरे | अकुर्वन्<br>अगच्छन्<br>अभाषन्त<br>भाषन्ते<br>अवसन्<br>कुर्वन्ति<br>वसन्ति |

III प्रदत्तवाक्येषु "किन्तु / अतः" इत्यनयोः उचितं पदं चित्वा रिक्तस्थानानि पूरयत ।

1. अहं सम्यक् पठामि । __________ प्रथमस्थानं प्राप्नोमि ।

2. व्यजनम् अस्ति । __________ विद्युत् नास्ति ।

3. श्वः परीक्षा भविष्यति । __________ अहं पठामि ।

4. श्वः परीक्षा भविष्यति । ________ सः न पठति ।

5. सः बुद्धिमान् अस्ति । ________ अलसः अस्ति ।

6. बहिः वर्षा भवति । ________ छत्रं नीत्वा गच्छ ।

7. अहं छत्रं नीत्वा गतः । ________ पुनः आनेतुं विस्मृतवान् ।

8. सः वृद्धः अस्ति । ________ मन्दं चलति ।

IV यत्र – तत्र / यदा – तदा / यदि – तर्हि – एतेषु उचितम् अव्ययपद्वयं चित्वा रिक्तस्थानपूर्तिं कुरुत ।

1. ________ अध्यापकः आगच्छति ________ छात्राः उत्तिष्ठन्ति ।

2. ________ अध्यापिका नास्ति ________ छात्रा कोलाहलं कुर्वन्ति ।

3. ________ धूमः अस्ति ________ अग्निः अस्ति ।

4. ________ नार्यः पूज्यन्ते ________ देवताः रमन्ते ।

5. ________ ज्वरः अस्ति ________ वैद्यं पश्यतु ।

6. ________ वसन्तः भवति ________ कोकिलः गायति ।

7. ________ शर्करा अस्ति ________ पिपीलिकाः आगच्छन्ति ।

8. ________ सूर्योदयः भवति ________ अन्धकारः नश्यति ।

9. ________ वर्षा अस्ति ________ विद्यालयस्य अवकाशः भवति ।

10. ________ माता गच्छति ________ शिशुः गच्छति ।



--------------------------------------------------------------